শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৬২

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৬২

*ইন্দ্ৰযাগৱিঘাতৱৰ্ণনম্*

কদাচিদ্গোপালান্ ৱিহিতমখসম্ভারৱিভৱান্
    নিরিক্ষ্য ত্বং শৌরে মঘৱমদমুধ্ৱংসিতুমনাঃ।
ৱিজানন্নপ্যেতান্ ৱিনযমৃদু নন্দাদিপশুপা-
    নপৃচ্ছঃ কো ৱাযং জনক ভৱতামুদ্যম ইতি॥ ১ ॥

বভাষে নন্দস্তৱাং সুত ননু ৱিধেযো মঘৱতো
    মখো ৱৰ্ষে ৱৰ্ষে সুখযতি স ৱৰ্ষেণ পৃথিৱীম্।
নৃণাং ৱৰ্ষাযত্তং নিখিলমুপজীৱ্যং মহিতলে
    ৱিশেষাদস্মাকং তৃণসলিলজীৱ্যা হি পশৱঃ॥ ২ ॥

ইতি শ্ৰুত্বা ৱাচং পিতুরযি ভৱানাহ সরসং
    ধিগেতন্নো সত্যং মঘৱজনিতা ৱৃষ্টিরিতি যত্।
অদৃষ্টং জীৱানাং সৃজতি খলু ৱৃষ্টিং সমুচিতাং
    মহারণ্যে ৱৃক্ষাঃ কিমিৱ বলিমিন্দ্ৰায দদতে॥ ৩ ॥

ইদং তাৱত্ সত্যং যদিহ পশৱো নঃ কুলধনং
    তদাজীৱ্যাযাসৌ বলিরচলভৰ্ত্ৰে সমুচিতঃ।
সুরেভ্যোপ্যুতকৃষ্টা ননু ধরণিদেৱাঃ ক্ষিতিতলে
    ততস্তেপ্যারাধ্যা ইতি জগদিথ ত্বং নিজজনান্॥ ৪ ॥

ভৱদ্বাচং শ্ৰুত্বা বহুমতিযুতাস্তেপি পশুপাঃ
    দ্বিজেন্দ্ৰানৰ্চন্তো বলিমদদুরুচ্চৈঃ ক্ষিতিভৃতে।
ৱ্যধুঃ প্ৰাদক্ষিণ্যং সুভৃশমনমন্নাদরযুতা-
    স্তৱমাদশশৈলাত্মা বলিমখিলমাভিরপুরতঃ॥ ৫ ॥

অৱোচশৈ্চৱং তান্ কিমিহ ৱিতথং মে নিগদিতং
গিরীন্দ্রো নন্বেষ স্ববলিমুপভুঙক্তে স্ৱৱপুষা।
অযং গোত্রো গোত্রদ্বিষি চ কুপিতে রক্ষিতুমলং
সমস্তানিত্যুক্তা জহৃষুরখিলা গোকুলজুষঃ॥ ৬ ॥

পরিপ্রীতাঃ যাতাঃ খলু ভৱদুপেতা ব্রজজুষো
ব্রজং যাৱত্তাৱন্নিজমখৱিভঙগং নিশমযন্।
ভৱন্তং জানন্নপ্যধিকরজসাক্রান্তহৃদযো
ন সেহে দেৱেন্দ্রস্তৱদুপরচিতাত্মোন্নতিরপি॥ ৭ ॥

মনুষ্যত্বং যাতো মধুভিদপি দেৱেষৱিনযং
ৱিধত্তে চেন্নষ্টস্ত্রিদশসদসাং কোপি মহিমা।
ততশ্চ ধ্ৱংসিষ্যে পশুপহতকস্য শ্রিযমিতি
প্রৱৃত্তস্তৱাং জেতুং স কিল মঘৱা দুর্মদনিধিঃ॥ ৮ ॥

ত্বদাৱাসং হন্তুং প্রলযজলদানম্বরভুৱি
প্রহিণৱন্ বিভ্রাণঃ কুলিশমযমভ্রেভগমনঃ।
প্রতস্থেঽন্যৈরন্তর্দহনমরুদাদ্যৈর্ৱিহসিতো
ভৱন্মাযা নৈৱ ত্রিভুৱনপতে মোহযতি কম্॥ ৯ ॥

সুরেন্দ্রঃ ক্রুদ্ধশ্চেত্ দ্বিজকরুণযা শৈলকৃপযা-
প্যনাতঙকোস্মাকং নিযত ইতি ৱিশ্বাস্য পশুপান্।
অহো কিন্নাযাতো গিরিভিদিতি সঞ্চিন্ত্য নিৱসন্
মরুদ্গেহাধীশ প্রণুদ মুরৱৈরিন্ মম গদান্॥ ১০ ॥

**********